ऽमयाः । तत्रेष्ट्वा तु गतः सिद्धिं सहस्राक्षो महायशाः । स्रष्टा भूतपतिर्यत्र सर्वलोकैः सनातनः । उपास्यते तिग्मतेजा यत्र भूतैः समन्ततः । नरनारायणौ ब्रह्मा मनुः स्थाणुश्च पञ्चमः । तत्र दिव्या त्रिपथगा प्रथमन्तु प्रतिष्ठिता । ब्रह्मलोकादपक्रान्ता सप्तधा प्रतिपद्यते । वस्वोकसारा नलिनी पावनी च सरस्वती । जम्बूनदी च सीता च गङ्गा सिन्धुश्च सप्तमी । अचिन्त्या दिव्यसङ्काशाः प्रभोरेवैष संविधिः । उपासते यत्र सत्रं सहस्रयुगपर्य्यये । दृश्यादृश्या च भवति तत्र तत्र सरस्वती । एता दिव्याः सप्त गङ्गास्त्रिषु लोकेषु विश्रुताः" ।

इलिनी स्त्री चन्द्रवंश्यमेधातिथिनृपकन्यायाम् । "मेधातिथिः सुतस्तस्य यस्मात् कण्वोऽभवद् द्विजः । इलिनी नाम यस्यासीत् कन्या वै जनमेजय !" हरिवं० ३२ अ० ।

इली स्त्री इल–गतौ क गौरा० ङीष् । करवाले (काटार)।

इलीविश पु० असुरभेदे "न्यविध्यदिलीविशस्य दृढाविभ्रश्टङ्गिणमभिनच्छुष्णमिन्द्रः" ऋ०१,३३,१२,

इलीश पु० इलीव करवालिकेव शोभते शुभ–ड । करवालिका सदृशावयवे स्वनामख्याते मत्स्यभेदे ।

इलिश पु० इलीश+पृ० । इलीशमत्स्ये (इलिश) ।

इल्वल पु० इल+स्वप्ने वलच्–नि० गुणाभावः । १मत्स्यभेदे २असुरभेदे च मेदि०स च सिंहिकापुत्रभेदः "सिंहिकायामथोत्पन्ना विप्रचित्तेः सुतास्तथा । दैत्यदानवसंयोगाज्जातास्तीव्रपराक्रमाः । सैंहिकेया इति ख्यातास्त्रयोदश महाबलाः । व्यंशः शल्यश्च बलिनौ नभश्चैव महाबलः । वातापिर्नमुचिश्चैव इल्वलः खसृमस्तथा । आञ्जिकोनरकश्चैव (कालनेमि) कालनाभस्तथैव च । राहुर्ज्येष्ठस्तु तेषां वै सूर्य्यचन्द्रप्रमर्द्दनः" हरि० ३ अ० । तच्चरितं यथा

"इल्वलो नाम दैतेय आसीत् कौरवनन्दन ! । मणिमत्यां पुरि पुरा वातापिस्तस्य चानुजः । स ब्राह्मणं तपोयुक्तमुवाच दितिनन्दनः । पुत्रं मे भगवानेकमिन्द्रतुल्यं प्रयच्छतु । तस्मै स ब्राह्मणो नादात् पुत्रं वासवसन्निभम् । चुक्रोध सोऽसुरस्तस्य ब्राह्मणस्य ततो भृशम् । तदाप्रभृति राजेन्द्र ! इल्वलो ब्रह्महाऽसुरः । मन्युमान् भ्रातरं छागं मायावी ह्यकरोत्ततः । मेषरूपी च वातापिः कामरूपोऽभवत् क्षणात् । संस्कृत्य च भोजयति ततो विप्रं जिघांसति । स चाह्वयति यं वाचा गतं वैवस्वतक्षयम् । स पुनर्देहमास्थाय जीवन् स्म प्रत्यदृश्यत । ततो वातापिमसुरं छागं कृत्वा सुसंस्कृतम् । तं ब्राह्मणं भोजयित्वा पुनरेव समाह्वयत् । तामिल्वलेन महता स्वरेण वाचमीरिताम् । श्रुत्वाऽतिमायो बलवान् क्षिप्रं ब्राह्मणकण्टकः । तस्य पार्श्वं विनिर्भिद्य ब्राह्मणस्य महासुरः । वातापिः प्रहसन्राजन्निश्चक्राम विनाशयन् । एवं स ब्राह्मणान्राजन् ! भोजयित्वा पुनः पुनः । हिंसयामास दैतेय इल्वलो दुष्टचेतनः" भा०व०९६अ० ।

२मृगशिरोनक्षत्रशिरःस्थासु पञ्चसु तारासु स्त्री०ब०व० । तत्र इन्वका इति पाठान्तरम् । इन्वन्ति प्रीणयन्ति इवि प्रीणने क नुम् इदित्त्वात् नुम् क्षिपकादि० न अत इत्त्वम् इति भानुदीक्षितः । तेन इल्वका इति लकारमध्यपाठकल्पनं प्रामादिकमेव । [ ऐन्वीत् । इन्वकाः ।

इव व्याप्तौ प्रीणने च इदित् भ्वा०पर०सक० सेट् । इन्वति

इव अव्य०इन्व–निरु० क । १सादृश्ये, २उत्प्रेक्षायाम्, ३ईषदर्थे, वाक्यालङ्कारद्योतकता चास्य तत्र उपमायाम् "इवेन नित्यसमासो विभक्त्यलोपश्चेति" वार्त्ति० उक्तेर्नित्यसमासः विभक्त्यलोपाभावश्च स च समासस्वरार्थ एव । "वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये" रघुः । "हंसीव कृष्ण ! ते कीर्त्तिः स्वर्गङ्गामवगाहते" चन्द्रालोकः । एतत्प्रयोगे श्रौती उपमा "श्रौती यथेववाशब्दा इवार्थे वा वतिर्यदि" सा०द०उक्तेः । उत्प्रेक्षायाम् । "गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव" रघुः । "गङ्गाम्भसि सुरत्राण ! तव निःस्वनः । स्नातीशारिवधूवर्गगर्भपातनपातकी" "मुखमेणीदृशो भाति पूर्णचन्द्र इवापरः" सा०द० इवादिशब्दप्रयोगे उत्प्रेक्षाया वाच्यत्वम् । "वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः" सा०द०उक्तेः । वाक्यालङ्कारे "सर्वदा क इव वा सुखिष्यति" किरा० "किमिव हि मधुराणां मण्डनं नाकृतीनाम्" शकु० "स्रजति सा कियतीमिव न व्यथाम्" नैष० ईषदर्थे "तदस्ति पर्युषितमिव" शत०ब्रा० "आवर्जिता किञ्चिदिव स्तनाभ्याम्" कुमा० ४अवधारणार्थे च । "प्रिये पूष न्निषुकृते वदेशाः" ऋ०१,१८४,३। "इषुकृतेव इवशब्द एवार्थे" भा० । "सत्येव तु वा ईश्वरा" शत०ब्रा० । इवशब्दोऽवधारणार्थे" भा० ।

इषीका स्त्री इषीका पृ० । इषीकाशब्दार्थे अमरटीका ।

इष गतौ सर्पणे च दिवा०पर०सक०सेट् । इष्यति, ऐष्यत् । ऐषीत् इषितः एषित्वा । "इष्यन् वाचमुपवक्तेव होतुः" ऋ० ९,९४,९ । "योऽभिवात इषितः प्रवाति" अथ० १०,८,३५ । "स तत्कर्षीषितस्तूयमन्ने" अथ० ६,३५,५ । "हिन्वानो वाचमिष्यसि" ऋ० ९,६४,९ । इष्का-